Leadership, Education, Personality: An Interdisciplinary Journal ISSN: 2524-6178
www.sibe.rpress.co.in, Vol. 9, Issue 12 Dec 2014

# तद्धितप्रयोगे ह्रासहेतुः

**डॉ. अशोक कुमार झा**
व्याख्याता—व्याकरण
राजकीय धूलेश्वर आचार्य संस्कृत महाविद्यालय
मनोहरपुर (जयपुर)

तद्धितान्तप्रयोगा दिनानुदिनं क्षीणाः सञ्जाताः। एतां दुर्दशां दृष्ट्वा व्याकुलाः प्रयोगमर्मज्ञा दुःखेन वदन्ति, 'गतास्तद्धितान्ताः', मृताः प्रक्रियाजाः, हताः सन्धि—बन्धा लुङ्श्चप्रयोगाः। इदानीन्तनानां जनानां प्रवृत्तिः कृदन्ते सुबन्ते कदाचित्तिङ्ङन्ते। महिम्नः स्तोत्रे तद्धिनान्तशब्दा बाहुल्येन प्रयुक्ताः सन्ति। इदानीन्तनानां विदुषां रचना कृदन्तबहुला, तत्र यदि पूजयति इत्यादिस्थाने 'पूजां करोति' इति प्रयुज्यते तदा कृदन्तसमादरः स्पष्ट एव। अध्ययनाभावाद् भावाभिव्यक्तिकाले ये तद्धितान्तप्रयोगा अनिवार्यास्ते तादृशस्य जनस्य भाषणलेखनादिकाले अपशब्दा भवन्ति। अतएव षष्ठमः, अष्टादशम इति प्रयोगस्तत्र तत्र श्रूयते। वैयाकरणः, शाब्दिकः नैयायिकः, मीमांसकः, शिक्षकः इत्यादिशब्दाः प्रयत्याऽपि भाषातो बहिष्कर्तुं न शक्याः। कौन्तेय, पार्थ, वासुदेव, पाणिनि, राघव, वरिष्ठ, आञ्जनेयादिशब्दास्तद्धितज्ञानां मनसि भारतीय—संस्कृतेः इतिहासायन्ते। एषां बहिष्कारेण संस्कृतौ तदीयजीवातुभूते वैदिकवाङ्मये संस्कृतवाङ्मये च कुठाराघातोऽसह्य एव।

समर्थानां प्रथमाद्वा इति पदत्रयं सर्वत्र तद्धिताधिकारसूत्रेष्वनुवर्तते।[1] प्राग्दिशो विभक्तिरिति सूत्रात् परस्तात्तु वा मात्रमनुवर्तते। तत उत्तरेषां प्रत्ययानां स्वार्थिकत्वेन समर्थानां प्रथमाद् इत्यनयोरनुवृत्तेः प्रयोजनाभावत्।[2] वा इत्यस्यानुवृत्तेर्वैकल्पिकत्वसूचनाद् वासुदेव इतिवत् वसुदेवस्यापत्यं कृष्णः इति वाक्यं वसुदेवपुत्रः कृष्ण इति समस्तं पदञ्च भवति। एवं वैयाकरण इत्यस्य स्थाने व्याकरणस्य अध्येता ज्ञाता च भवति। वैकल्पिकत्वमपि तद्धितान्तप्रयोगस्य एको ह्रासहेतुः। अतद्धितज्ञा वाक्येन समासेन च भावं बोधयितुमलं भवन्ति भाषाशैथिल्यमुपेक्ष्य।

दाक्षिणात्याः प्रियतद्धितास्तत्र तत्र समुचितं प्रयोगं कुर्वन्ति अवएव भाष्यकारो लोकेवेदे इत्यस्य च स्थाने वार्तिककारस्य 'लौकिके—वैदिके' इति प्रयोगम् तद्धितप्रियपरकमुक्त्वा लौकिके वैदिके कृतान्ते इति वक्तव्यमासीत् तत्र कृतान्ते इति पदमध्याहरणीयम्। 'लौकिके वैदिके' इति पदस्यौचित्यमेवेति। एतेन दाक्षिणात्यस्य तद्धितज्ञत्वं तत्प्रयोगपरत्वञ्च स्तुत्यमिति विज्ञायते।[3] व्याकरणस्य प्रयोजनकथनावसरे 'दशम्यां पुत्रस्येत्यादिना प्रयोजनमेकमुक्तम् जातस्य पुत्रस्य पिता एकादशे दिवसे नामकरणसंस्कारं करोति। दशमी—पदस्य तत्रैव लाक्षणिकं कृत्वा तत्र नाम कथं भवेदिति विचार्य प्रोक्तम्। नाम घोषवद्भवेत्, मध्ये यरलवा भवेयुः तत् त्रिपुरुषानुकं भवेत् अनरिप्रतिष्ठितम् तद्व्यक्षरं चतुरक्षरं कृत्प्रत्ययनिर्मितं भवेत् न तद्धितप्रत्ययव्युत्पादितम्। अत्र तद्धितनिष्पादितस्य शब्दस्य नाम्नि प्रयोगाभावः, कृतश्च प्रयोगस्तेनैव कर्तुं

---

1 इदं पदत्रयमधिक्रियत इति सिद्धान्तकौमुदी—अपत्याधिकारप्रकरणोपक्रमे।
2 समर्थानामिति प्रथमादिति च निवृत्तम् वेतित्वनुवर्तन एव (सि. कौ. प्राग्दिशीयप्रकरणोपक्रमे)
3 यथा लौकिकवैदिकेषु (महाभाष्ये पश्पशाह्निके वार्तिके चतुर्थखण्डम् 2—46)

शक्यते यो व्याकरणं कृत्स्नं जानीयात्। अतस्तद्धितप्रकरणाध्ययनस्य अनिवार्यताऽपि ध्वनिता।[4] ज्ञानं विधेरिव निषेधस्यापि कृते आवश्यकम् तद्धितान्तप्रयोगः कथं निषिध्यते, अपत्याद्यर्थ–प्रयुक्तस्य तद्धियान्तशब्दस्य महानेक इतिहासो भवति। व्यक्तिवाचकसंज्ञायामापन्ने शब्दे स इतिहासः स्थातुं न शक्नोति। किञ्च नामधेयस्य भागद्वयं भवति, प्रथमे नामविशेषाक्षरविशेषः, द्वितीये च गोत्राक्षरनिवेशः क्रियते। गोत्रावगयते गृहीतं पदं तद्धितान्तपरकमेव भवति यदि नामकरणमपि तादृशमेव स्यात् विरोधाभास आपद्येत, यथा गार्ग्यायणः कौशिक इत्यादौ। यदि कौशिको न गार्ग्यायणः, यदि गार्ग्यायणो न कौशिक इति, इत्थं प्रथमस्य रूढत्वे स्वीकृते तद्धितव्युत्पत्तिर्व्यर्था। कृदन्तमादाय नामकरणे देवदत्त इत्यादौ देवप्रसादप्राप्तत्वमपि गम्यते न च स विरोध आपतति। पाणिनि र्वासुदेव इत्यादितद्धितपरकं नाम वंशपरम्परादिसूचकमेव। मूलं नाम तु पाणिनेः किमप्यन्यदेव। यथा वासुदेव भगवतः श्रीकृष्ण इति। तद्धितनिष्पन्ननामानि प्रायः एवंविधान्येव। आद्यक्षरमवरुद्धं भवेन्नाम्न इत्यपि तत्र सूचितमस्ति। तद्धितप्रत्यये कृते तु प्रायेण आदिवृद्धि र्जायते, अतोऽस्य निषेधः सम्भाव्यते। भोजस्य काले तद्धितप्रयोगप्रोत्साहनाय दत्तस्य पुरस्कारादे वर्णनं भोजप्रबन्धे प्राप्यते यथा कञ्चिद् विप्रं पदातिं पारेनद्या गच्छन्तं उरुदध्नं विलोक्य राजाभोजोऽप्राक्षीत् कियन्मात्रं जलं विप्र स च उदतरत्–उरुदध्नं नराधिप। अत्र वाक्ये मात्रच्प्रत्ययस्य प्रसिद्धस्य प्रयोगं श्रुत्वा उत्तरवाक्ये साधारणो जनस्तमेव प्रयोगं प्रयुञ्जीत, किन्तु दध्न प्रयोगस्तस्य महावैयाकरणत्वमनुमाय तेन लक्षं मुद्राणां दत्वा स समादृतः।

एतेन ज्ञायते यत् तत्कालेऽपि तद्धितप्रयोक्तारोऽल्पीयांसोऽावन्निति। तद्धितप्रयोगस्य काठिन्यमपि तद्धासरू एको हेतुः। पटुपटुर्देवदत्त इत्यत्र धर्मलुप्ता तद्धितगोपमा प्रकारे गुणवचनस्य इति सादृश्ये द्विर्भावविधानाद् इत्यप्पयदीक्षितः। जगन्नाथस्तु अत्र वाचकोऽपि लुप्त इति वाचकधर्मलुप्ताया इदमुदाहरणम्। न चात्र वाचकस्य दुर्भावस्य एवं सत्त्वात् नाऽस्ति लोपोऽपि धर्ममात्रस्य इति वाच्यम्, द्विर्भावस्य सादृश्यवाच्योक्ते र्महाभाष्कैयटादिविरुद्धत्वात्। द्विर्भावः सादृश्यस्य द्योतको न वाचकः। एचञ्च पटुपटुः (अर्थात् पटुसदृशः) इति धर्मवाचकलुप्तोदाहरणम्, न धर्मलुप्तायाः[5] रूपयौवनलावण्यस्पृहणीयतराकृतिः। पुरतो हरिणाक्षीणामेष पुष्यायुधीयति। अत्र 'पुरत' इति तद्धितप्रयोगोऽप्पयदीक्षितकृतोऽपशब्द इति जगन्नाथः।[6] नगरवाचिनः पुर शब्दात् तसिलि हरिणाक्षीणां नगराद् इत्यर्थस्यासङ्तेः। नहि पुर्ववाचकः पुरशब्दः क्वापि श्रूयते। पूर्वशब्दात्तु पूर्वाधरापराणाम् असि पुरधवश्चैषाम्[7] इति असौ पुरादेशे पुर इति भाव्यं न तु पुरत इति। अत एव 'अमुं पुरः पश्यसि देवदारुम्' इति प्रायुङक्त महाकविकालिदासः।[8] इत्थं जगन्नाथेन 'पुरत' इति प्रयोगस्यासाधुत्वं दर्शितम्, परन्तु नागेशोऽत्र वक्ति नाऽत्र तसिल् किन्तु आद्यादित्वात् तसिः। 'पुरत' इति निपातोऽप्यस्ति अतो नाऽत्र प्रमादो दीक्षितस्य। अतएव 'इयञ्च तेऽन्या पुरतो विडम्बना'[9] इति कालिदासः सङ्गच्छेत् इति केचित्। अन्ये

---

[4] दशाम्यां पुत्रस्य महाभाष्यम् पश्पशाह्निके, पृ.29.
[5] रसगङ्गाधर, पृ.224
[6] रसगङ्गाधर, पृ.226
[7] पा.सू. – 5–3–39
[8] रघुवंशम् – 2–36
[9] कुमारसम्भवम् – 5–70

तु दक्षिणोत्तराभ्याम् अतसुच् इत्यत्र तसुचा एव पुंवद्भावेन सिद्धेः, अतसुच्विधानम् अन्यस्मादपि इति ज्ञापनाय। तेन पचाद्यजन्तात् पुरशब्दात् तस्मिन्निष्टासिद्धिरित्याहुः। वस्तुतस्तु पुर अग्रगमने इति चौरादिकात् निजभावे इगुपधलक्षणेके सार्वविभक्तिकतसिरिति बोध्यम्। इत्थं यत्र तद्धितप्रत्ययोऽसाधुरित्येकेनोक्तं तत्रान्यैरसाधुत्वं दर्शितम् इति तद्धितप्रयोगस्य काठिन्यं स्पष्टम् अयमपि तद्धितस्य प्रयोगे ह्रासहेतुः।

एकस्मिन्नेवार्थे समानप्रत्ययस्य समानप्रकृतेः प्रयोगदर्शनात् कस्मिन्नर्थे प्रत्यय इति निश्चयो झटिति बुद्धिं नाधिरोहति। यथा पुत्रक इति प्रयोगोऽनुकम्पायां, कुत्सिते, ह्रस्वे, इवे प्रतिकृतौ इत्यादिभिः सूत्रैर्विभिन्नेष्वर्थेषु निष्पादयितुं शक्यस्तत्र न निश्चीयते प्रसंङ्समालोचनमन्तरा कस्मिन्नर्थे प्रत्यय इति। एवं पार्थिव इत्यत्र पृथिव्या अयम्, पृथिव्या ईश्वरः पृथिव्या निमित्तं संयोग उत्पातो वा इति सूत्रभेददार्थभेदेन नान्यतरार्थस्य निर्धारणं कर्तुं शक्यते। एतेन विज्ञायते यद् बहुष्वर्थेषु समानरूपनिष्पादनात् सन्देहसम्भवेन तादृशप्रयोगावसरे लोकस्तत्प्रयोक्तुं न प्रवर्तते। इत्थमेव शैषिकप्रकरणे 'तत्र भवः', तत्र जातः, 'सम्भूते प्रायभवः', तत आगतः, 'सोऽस्य निवासः', अभिजनश्च भक्तिः, इत्येभिः स्त्रौघ्न इत्येकं रूपं निष्पन्नं कस्मिन्नर्थविशेष उपात्तम् इति नामपदं गम्यते। न च सम्प्रति सामान्यतया पथिकः, पान्थः, इत्यनयोर्भेदो गम्यते सामान्यैः। न चाधुना माशब्दिकः, सौस्नातिकः सौखशायनिकः, इत्यादिपदानाम् अर्थः सपदि बुद्धौ 'नारोहति नच कश्चित् प्रयोगं कुर्वाणो दृश्यते। बहुषु प्रयोगेषु साधुत्वविषये संदेहादपि तद्धिता जनैरुपेक्षिताः। यथा संज्ञायाम् जन्या इति सूत्रेण निष्पाद्यमानः प्रयोगो जन्या इति। अत्र प्रयोगे शाब्दिकानामेव परस्परं विवादः। यथा काशिकावृत्तिकारो जनीशब्दाद्द्वितीया–समर्थाद्वहतीत्यस्मिन्नर्थे यत्प्रत्ययो भवति, समुदायेन चेत् संज्ञा गम्यते।[10] भट्टोजिदीक्षितैस्तु जन्या इति निर्विसर्गः पाठः स्थापितः। व्याख्यायाञ्चैकवचनमेव प्रदर्शितम्, तच्च नागेशेन प्रत्याख्यातम् पञ्चमीनिर्देशािदिति वार्तिकांशव्याख्यातुर्महाभाष्यकारस्य जनिशब्दादेषा पञ्चमी इति वचनबलेन। अत्रैवं प्रश्नो जागर्ति संज्ञायां जन्या इति सूत्रे कश्च तावान्निपातनावकाशः? संज्ञायां जन्याः जनीशब्दात् तद्वहति रथयुगप्रसाङ्म् इति तद्वहति इत्यर्थे प्राग्घिताद्यत् इति यत्प्रत्ययो भवति, इत्येष सरलः सूत्रार्थः। भाष्यकारैस्तु जनन्याः जनीभावो निपात्यते यच्च प्रत्यय इति जनीवधूः, तां वहति, प्रापयति जन्या इति सिद्धान्तकौमुदीकारः। नागेशस्तु सविसर्गं पाठं स्वीकुरुते। 'यातीति जन्यानवदत् कुमारी' इति कालिदासप्रयोगं प्रदर्शयेत।[11] चान्द्रव्याकरणे निपातनस्य प्रयोजनद्वयं दर्शितम् यद्भहुवचनत्वञ्चेति। महाभाष्यकारानुसारेण संज्ञायाम् जन्या इत्यत्र त्रैकालिकक्रिया–सम्बन्धः। ये भविष्यति काले जनी वोढास्तेऽपि जन्याः। भूतकाले अवाक्षुस्तेऽपि जन्याः। अनुवृत्त्या नाऽयमर्थो लभ्यते इति सर्वकालप्रत्ययविध्यर्थं निपातनम्।

'जन्यास्ततः फणभृतामधिपं सुरौघान्' इति हर्षप्रयोगे बहुवचनो जन्यशब्दो यानवाहार्थकः प्रयुक्तः पाणिनेः संज्ञायाम् जन्या इति सूत्रे बहुवचनं गतार्थतया इतीत्थं विज्ञायते व्याकरणसिद्धस्यापि लोके अर्थानिर्णयात् प्रयोगह्रासः सञ्जातः। छात्रशब्दस्य स्त्रीलिङ्गेऽध्येत्र्यामर्थे छात्रा छात्री वा प्रयोग इत्यद्यापि विमर्शविषतया चिन्त्यते। व्याकरणानुसारं छात्त्र इति यथार्थशब्दः परन्तु प्राय एकतकार एव प्रयुज्यते।

---

[10] काशिकासूत्रम् – 4–4–82
[11] रघुवंशम् – 6–30

प्राचीनस्मृत्यादिषु छात्री छात्रा वा प्रयोगो नाधिगम्यते।। 'छत्रादिभ्यो णः'[12] इति सूत्रेण गुरोर्दोषावरणं छत्रम्, तच्छीलमस्येति छात्र इत्यर्थे छत्रशब्दात् णप्रत्ययेन निष्पाद्यते। पाणिनीयतन्त्रे ताच्छीलकेणेऽपि अण्कृतानि भवन्ति[13] – इति परिभाषया अणप्रयुक्ते स्त्रीलिङ्गेङीपी प्रत्यये छात्री इत्येव स्यात् न तु छात्रा। किन्तूक्तपरिभाषा ज्ञापकसिद्धा इति ज्ञापकसिद्धां न सर्वत्र[14] इति परिभाषया ताच्छीलके णेऽण्कृतानि भवन्ति इति परिभाषां प्रबाध्य छात्रा इति कथन्न स्यात्? इति विषये बहुविचारः शास्त्रेषु लभ्यते। एवं शास्त्रकारेणाऽपि बहुषु स्थलेषु स्वकीयोऽन्तिमो हि निर्णयो नैवादायि। राष्ट्रिय–राष्ट्रीयशब्दयोरद्यापि साधुताविषयेऽस्ति विवादः। राष्ट्रावारपारद्धखौ[15] इति सूत्रबलेन घप्रत्ययेन ह्रस्वमध्यमरूपम्, वृद्धाच्छः[16] छप्रभृत्या दीर्घमध्यञ्च रूपं सिद्ध्यति। मनुस्मृतौ तु राष्ट्रिकशब्दस्यापि प्रयोगो लभ्यते।[17] वस्तुतो राष्ट्रावारपाराद्घखौ "इति सूत्रवृत्तिस्तद्धितस्य सर्वेषु प्रकरणेषु सर्वेषु चार्थेषु न भवति, निश्चितम् अवधिं यावत् तत्प्रवत्र्यानन्तरं नाधिकरोति, एतस्मादधिकारात् बहिर्भूतेष्वर्थेषु तत्स्थलीयाः ठछादयः प्रत्यया एवं भवन्ति। राष्ट्रावार इति सूत्रं शेषाधिकारपठितत्वात् शैषिकप्रकरणपर्यन्तमेव प्रयोज्यम् नातः परमपि। अतो राष्ट्रे जातः, राष्ट्रे भवः, राष्ट्रादागतः इतयादिषवर्थेषु राष्ट्रिय इति रूपमेव साधुः, किन्तु अवयवे च प्राण्योषधिवृक्षेभ्यः इति विकाराद्यर्थेषु तत्प्रकरणविहिता एवं प्रत्यया भविष्यन्ति न तु घः। प्राण्योषधि" इति सूत्रात्परं घप्रत्ययस्य प्रवृत्ति र्न भवति एतत्काशिकावचनेन विज्ञायते। तस्य प्रकरणे तस्येति पुनर्वचनं शैषिकनिवृत्यर्थम्, विकारावयवयोर्घादयो न भवन्ति।

अतः शैषिकाधिकारो बहिर्भूतार्थेषु यथा ठक्प्रत्ययेन राष्ट्रिका इति रूपं जायते तथा छप्रत्ययेन राष्ट्रीयशब्दोऽपि पाणिनितन्त्रेण कथन्न सिद्ध्यति। उदाहरणार्थमित्थं वक्तुं शक्यते यद् राष्ट्राय हितमित्यर्थे तस्मैहितम् इत्यर्थे, छप्रत्ययेन राष्ट्रीयशब्द एवं सेत्स्यति। हितार्थे कदापि छप्रत्ययो न स्यात् हितार्थस्य शैषिकप्रकरणेऽयोगात्। एवं विचार्यते यत् तद्धितविषयेऽपि बहवो विसंवादास्तत्प्रयोगह्रासहेतुत्वेन निर्देष्टुं शक्यते। अस्माद्धेतोरिदानीं तद्धिताः शनैः शनैः प्रयोक्तृणामभ्यासात् विस्मृताः सन्तः क्षीणतां प्राप्ताः।

---

12 पा.सू. – 4–4–62
13 परिभाषेन्दुशेखरः – पृ.सं.88
14 परिभाषेन्दुशेखरः – पृ.सं.126
15 पा.सू. – 4–2–93
16 पा.सू. – 5–1–16
17 राष्ट्रिकैः सह तदाष्टं क्षिप्रमेव विनश्यति (मनु. 10.61)